श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीमद्वेङ्कटाध्वरि विरचितम्

# ॥ श्रीलक्ष्मीसहस्रम् ॥

## ॥ औदार्यस्तबकः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ औदार्यस्तबकः ॥

वाराशिदुहितुस्तस्या वरिवस्यां विदध्महे।
अनन्यजनसामान्यामाहुर्यस्या वदान्यताम्॥ १ ॥

द्वित्वं चेदधिरसनं विलोचनेषु त्रित्वं वा यदि वदनेषु वा चतुष्ट्वम्।
यद्वा स्यादधिभुजमेतदेव वक्तुं दातृत्वं तव कवयस्तदा क्षमेरन्॥ २ ॥

यः पिबेज्जलधिमम्ब यस्तरेद्यश्च तत्र नियतं शयीत वा।
तेन वर्णयितुमर्णवात्मजे शक्यते तव वदान्यता न वा॥ ३ ॥

अम्ब त्वमेवाश्रितमृत्युहन्त्री सनातनी सर्वफलप्रदासि।
स्वयं च पञ्चत्वमुपाश्रितेभ्यो देवद्रुमेभ्यो लभतां फलं कः॥ ४ ॥

तामत्युदारां कमले भजे त्वां यया सुधाब्धौ सहजन्ममात्रात्।
एकस्तरुर्लुब्धवतंसकोऽन्यः पशुश्च कश्चित्प्रथितो वदान्यः॥ ५ ॥

त्वमम्ब दात्रीति किमत्र चित्रं त्वद्वासदेशेऽपि न लोभवार्ता।
निदर्शनं तत्र भवन्निवासः सर्वस्वदायी स वृषाद्रिनाथः॥ ६ ॥

औदार्यमास्तां नृहरेर्य एष हिरण्यदानावसरे सरोषः।
सानन्दमिष्टं सकलं ददत्याः स्तुत्यं वदान्यत्वमिदं भवत्याः॥ ७ ॥

देहि देवि दयया निरामयामत्र च श्रियममुत्र च स्वयम्।
सञ्चरेम न यथा वयं मुहुर्याचका इह पिशाचका इव॥ ८ ॥

त्वमेव सर्वकाङ्क्षितप्रदा पदाब्जसेविनां
    वदान्यतागुणस्तु ते वदान्यतः क्व दृश्यते।
सुधापयोधिकन्यके मुधा समुन्नतिस्पृशा
    न दानवारिदारुणोत्तमेन विद्यते फलम्॥ ९ ॥

श्रीवत्सजुष्टं स्थलमाश्रिता त्वं मनोहराक्षीरचिताश्रितश्रीः।
प्रवालदीधित्यवलम्बिताङ्घ्रिः सत्यं रमे कामदुघास्युदारा॥ १०॥

ख्यातः कलामात्रद एष चन्द्रो मातः शिबिश्चेत् पलमात्रदायी।
विषप्रदो वारिधरः श्रितानां कल्याणि काङ्क्षाधिकदा त्वमेव॥ ११॥

कल्पद्रुमः सुमित एव घनोऽप्रदाता
कर्णोऽप्यपार्थकरुणः स बलिः कुदाता।
नाथस्तवापि कमले स हिरण्यहारी
नातोऽस्ति ते वितरणे प्रतिवस्तुकिञ्चित्॥ १२॥

आमोदजुष्टं मधुकालयोगात् फलं ददानं भजतामभीष्टम्।
शाखाशतोदारसुपर्णवाहं देहं रमे कल्पतरुं तवाहुः॥ १३॥

मुदा वदान्याश्रितमब्धिकन्ये यं किन्नरेशादधिकं करोषि।
न किं नरेशादधिकः स एष इतीममाहुर्भुवि हन्त सन्तः॥ १४॥

विविधविभवदात्रीमिन्दिरे विश्वधात्रीं
भगवति भवतीं यः सेवते देवतेड्याम्।
अधिकृतिलवमात्रादन्तरिक्षोन्मुखाक्षान्
अयमगणितसत्त्वानल्पकान्नोपसर्पेत्॥ १५॥

त्वयि सति भगवत्यां सर्वमिष्टं ददत्यां
किमपि नृपपिशाचं याचते यः कुचेताः।
फलवति सहकारे भासुरे सत्यदूरे
श्रयति दुरधिरोहं देवि शाकोटकं सः॥ १६॥

प्रपदनजुषां दृष्टादृष्टार्पणैकवदान्ययोः
तव चरणयोः सेवामेवाचराणि हरेः प्रिये।
सकृदपि पुनस्त्रासी नासीय हन्त विवित्सया
परुषवचसां राज्ञां प्राज्ञावमानकृतां गिरः॥ १७॥

दृष्टादृष्टदयार्द्रया शिशिरया दत्ताखिलार्थास्त्वया
मातर्वातविधूतवारिदचलश्रीलेशलब्धोन्नतेः।

दर्पोद्रेकविनर्तितभ्रुपरुषं दन्दह्यमानेक्षणं
दस्योरास्यमुपास्य कस्यचिदमी न स्याम हास्या वयम्॥ १८ ॥

कातर्येण कदर्यवर्यनृपतिप्रीतिप्रतीक्षोदितः
कष्टं कष्टमपास्त वास्तव चमत्कारो न मे रोचते।
रामे वेङ्कटनेतुरद्भुतगुणग्रामे दयामेदुरां
त्वामेव श्रितकामधेनुमसकृत् सा मे स्तुतां भारती॥ १९ ॥

भीमानहं न भीमान् राज्ञां निचयान् श्रयेय साराज्ञान्।
कल्पककल्पकटाक्षान् दारान् शौरेर्भजे महोदारान्॥ २० ॥

॥ इति श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे औदार्यस्तबकः ॥